# Kashyah Bhairavamahatmyam Kalabhairavamahatmyam

# કાશ્યાઃ ભૈરવમાહાત્મ્યમ્ અથવા કાલભૈરવમાહાત્મ્યમ્

## Document Information

Text title : Kashyah Bhairavamahatmyam Kalabhairavamahatmyam

File name : kAshyAHbhairavamAhAtmyamathavAkAlabhairavamAhAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 403.2-436||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશ્યાઃ ભૈરવમાહાત્મ્યમ્ અથવા કાલભૈરવમાહાત્મ્યમ્

- શિવપાર્વતીસંવાદે -
અશૈવં ભૈરવો વીક્ષ્ય દાવાનલસમપ્રભઃ ॥ ૪૦૩॥

દહિષ્યતિ ન સન્દેહસ્તમશૈવં દુરાસદમ્ ।
અશૈવનાશનાર્થાય કાશ્યાં શ્રીકાલભૈરવઃ ॥ ૪૦૪॥

સ્થાપિતોઽસ્તિ મયા દેવિ સુરગન્ધર્વપૂજિતઃ ।
દૃશ્યતે ભૈરવઃ કાશ્યામશૈવપ્રલયાનલઃ ॥ ૪૦૫॥

ચતુર્દશેઽપિ ભુવને તત્તુલ્યો નાસ્તિ શાસકઃ ।
હન્ત્યહં બ્રહ્મવિષ્ણ્વાદીન્ ક્રોધસઙ્કુલિતેક્ષણઃ ॥ ૪૦૬॥

મહાકાલાનલપ્રખ્યો દુરાધર્ષો મમાપ્યયમ્ ।
યાતનાસ્તમ્ભનિકટે યદા શૂલધરઃ સ્થિતઃ ॥ ૪૦૭॥

તદા મમાપિ સુભગે દુર્નિરીક્ષ્યો હિ ભૈરવઃ ।
એકોઽપ્યનેકધા ભૂત્વા વિશ્વરૂપોઽતિભીષણઃ ॥ ૪૦૮॥

સઞ્ચરત્યસ્ત્રહસ્તોઽયં યાતનાસ્તમ્ભવીથિષુ ।
વિગ્રહં કાલનાથસ્ય પ્રજ્વલદ્ભૂધરા ઇવ ॥ ૪૦૯॥

યાતનાસ્તમ્ભપાર્શ્વેષુ દૃશ્યન્તે ભૈરવાઃ શિવે ।
અવાપુર્ભૈરવં ક્રુદ્ધં પુરા વિષ્ણુપુરોગમાઃ ॥ ૪૧૦॥

તે તત્ક્રોધાનલહતાઃ નિપેતુર્ભુવિ મૂર્ચ્છિતાઃ ।
તતસ્તે યુગપર્યન્તં પતિતાઃ પુનરુત્થિતાઃ ॥ ૪૧૧॥

શાન્તે ક્રોધાનલે નો ચેદ્ધાસ્યન્તે તેઽપિ ભસ્મતામ્ ।
પ્રત્યાશ્રમં પ્રતિગૃહં પ્રવિશ્યાયં તુ ભૈરવઃ ॥ ૪૧૨॥

અશૈવાન્પાતયેત્પ્રાજ્ઞઃ શિવાર્ચનપરાઙ્મુખાન્ ।
ભસ્મોદ્ધૂલિતરુદ્રાક્ષધારણાદિપરાઙ્મુખાન્ ॥ ૪૧૩॥

લિઙ્ગપૂજાવિહીનાંશ્ચ દૃષ્ટ્વા ક્રુદ્ધો ભવત્યયમ્ ।
તત્ક્રોધો વિફલો નૈવ ભવિષ્યતિ કદાચન ॥ ૪૧૪॥

યસ્મિન્ ક્રોધોऽસ્ય તં ઘોરે પાતયત્યસ્ત્રમણ્ડલે ।
દેવાનામપિ સર્વેષાં શાસ્તા શ્રીકાલભૈરવઃ ॥ ૪૧૫॥

તદન્યે તૃણભૂતાસ્તુ ગન્ધર્વા મુનયો નરાઃ ।
ભૈરવો ભીમવેષોऽયં દુર્નિરીક્ષ્યઃ સુરૈરપિ ॥ ૪૧૬॥

યદા ક્રોધસમાક્રાન્તસ્તદા દ્રષ્ટું ન શક્યતે ।
અશૈવશાસકં ક્રૂરં પ્રાપ્ય શ્રીકાલભૈરવમ્ ॥ ૪૧૭॥

સુખેન સંવસામ્યત્ર કાશ્યાં નિત્યં વરાનને ।
યદા તુ શૈવધર્માણાં સઙ્ક્ષયઃ સમ્ભવિષ્યતિ ॥ ૪૧૮॥

અશૈવાનાં તુ દુષ્ટાનાં દુઃખદો ભૈરવો ભવેત્ ।
અશૈવાનાં તદન્યસ્તુ શાસકો ન ભવિષ્યતિ ॥ ૪૧૯॥

માહાત્મ્યં ભૈરવસ્યેદં સમાખ્યાતં મયા શિવે ।
સર્વપાપક્ષયકરં પઠતાં શૃણ્વતામપિ ॥ ૪૨૦॥

યેનેદં પઠ્યતે પ્રાતર્માહાત્મ્યં ભૈરવસ્ય તુ ।
ન તસ્ય સર્વથા દુઃખં સ્વપ્નેऽપિ કમલાનને ॥ ૪૨૧॥

ઇદં માહાત્મ્યમમલમાદિત્યાભિમુખો યદિ ।
પઠતિ પ્રીતિહૃદયો સ ન પ્રાપ્નોતિ યાતનામ્ ॥ ૪૨૨॥

બાલગ્રહાદિરોગેષુ રક્ષાકરમમુત્તમમ્ ।
કુષ્ઠાપસ્મારરોગાદિવિનાશકમપિ પ્રિયે ॥ ૪૨૩॥

ભૂર્જપત્રે લિખિત્વેદં માહાત્મ્યં પ્રત્યહં શિવે ।
યઃ પૂજયિષ્યતિ પ્રાજ્ઞઃ સ દુઃખાનિ ન પશ્યતિ ॥ ૪૨૪॥

એતન્માહાત્મ્યમન્ત્રૈસ્તુ પ્રત્યહં ભૈરવાર્ચકૈઃ ।
પ્રીણનીયો ભીમરૂપો ભૈરવો ભીમવિક્રમઃ ॥ ૪૨૫॥

કાલાષ્ટમ્યાં વિશેષેણ કાલભૈરવસન્નિધૌ ।
તત્પ્રાદુર્ભાવમાહાત્મ્યં પઠનીયં પ્રયત્નતઃ ॥ ૪૨૬॥

શૃણ્વન્ શ્રીભૈરવસ્યેમાં પ્રાદુર્ભાવકથાન્નરઃ ।
ભૈરવાચરિતઃ શૈવો યાતનાં નૈવ પશ્યતિ ॥ ૪૨૭॥

નિત્યં ભૈરવમાહાત્મ્યં મન્ત્રાવર્તનપૂર્વકમ્ ।
પ્રદક્ષિણાદિકં કાર્યં શ્રદ્ધયા યાતનાપહમ્ ॥ ૪૨૮॥

શ્રી કાલભૈરવે ભક્તિઃ સદા કાર્યા પ્રયત્નતઃ ।
પૂજનીયોઽન્વહં પૂજ્યો દેવાનામપિ શાસકઃ ॥ ૪૨૯॥

દેવાશ્ચ સર્વદા ભીતાઃ શાસકં કાલભૈરવમ્ ।
પૂજયન્ત્યતિયત્નેન પ્રત્યહં ભીમવિક્રમમ્ ॥ ૪૩૦॥

ભૈરવાદુગ્રરૂપાદ્ધિ નાન્યઃ કાશ્યાં પ્રકાશકઃ (પ્રશાસકઃ) ।
અશૈવાદપરઃ કાશ્યાં શાસ્યોઽપિ ન વરાનને ॥ ૪૩૧॥

અશૈવં મૃતમાલોક્ય કાશ્યાં ભૈરવકિઙ્કરાઃ ।
દીર્ઘતપ્તાયસૈઃ શસ્ત્રૈસ્તાડયન્ત્યુરુવિક્રમાઃ ॥ ૪૩૨॥

પ્રલયાનલસઙ્કાશો જ્વાલામાલાસમાવૃતઃ ।
કાલભૈરવકોપાગ્નિરશૈવેન્ધનદાહકઃ ॥ ૪૩૩॥

તતઃ કાશ્યાં વિશેષેણ શિવૈકપરદૈવતૈઃ ।
શૈવૈઃ સ્થાતવ્યમનિશમશૈવૈર્ન કદાચન ॥ ૪૩૪॥

કપાલી કુણ્ડલી ભીમો ભૈરવો ભીમવિક્રમઃ ।
વ્યાલોપવીતી કવચી શૂલી શૂરઃ શિવપ્રિયઃ ॥ ૪૩૫॥

એતાનિ દશનામાનિ પઠન્ યઃ પ્રણમેત્સદા ।
શૈવઃ શિવાર્ચકસ્તસ્ય નાસ્તિ ભૈરવયાતના ॥ ૪૩૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશ્યાઃ ભૈરવમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૪૦૩.૨-૪૩૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 403.2-436..

Notes:
Śiva શિવ reveals to Pārvatī પાર્વતી the significance of Manifestation and Presence of Bhairava ભૈરવ – more specifically, Kālabhairava કાલભૈરવ, and His worship, especially during Kālāṣṭamī કાલાષ્ટમી. Śiva શિવ mentions about the ten names (daśanāmānī દશનામાનિ that can protect one against the wrath of Bhairava ભૈરવ.

Proofread by Ruma Dewan

*Kashyah Bhairavamahatmyam Kalabhairavamahatmyam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*